कल्कैश्च मूर्द्धनि। प्रलेपः सघृतः शीतः क्षीरपिष्टः प्रशस्यते। लेख्याञ्जनैरपहरेदर्म्मशेषं भवेद्यदि। अर्म्म चाल्पन्दधिनिभन्नीलं रक्तमथापि वा। धूसरन्तनु यच्चापि शुक्रवत्तदुपाचरेत्। चर्म्माभम्बहलं यत्तु स्नायुमांसघनावृतम्। छेद्यमेव तदर्म्म स्यात्कृष्णमण्डलगञ्च यत्। विशुद्धवर्णमक्लिष्टं क्रियास्वक्षिगतक्लमम्। छिन्नेऽर्म्मणि भवेत्सम्यग्यथास्वमनुपद्रवम्। सिराजाले सिरायास्तु कठिनास्ताश्च बुद्धिमान्। उल्लिखेन्मण्डलाग्रेण वडिशेनावलम्बिताः। सिरासु पिडका जाता या न सिध्यन्ति भेषजैः। अर्म्मवन्मण्डलाग्रेण तासाञ्छेदनमिष्यते। रोगयोस्त्वेतयोः कार्य्यमर्म्मोक्तं प्रतिसारणम्। विधिश्चापि यथादोषं लेखनद्रव्यसम्भृतः। सन्धौ संस्वेद्य शस्त्रेण पर्वणीकां विचक्षणः। उत्तरे च त्रिभागे च वडिशेनावलम्बिताम्। छिन्द्यात्ततोऽर्द्धमध्ये स्यादस्रुनाडी ह्यतोऽन्यथा। प्रतिसारणमत्रापि सैन्धवक्षौद्रमिष्यते। लेखनीयानि चूर्णानि व्याधिशेषस्य भेषजम्। शङ्खं समुद्रफेनञ्च मण्डूकीञ्च समुद्रजाम्। स्फटिकं कुरुविन्दञ्च प्रवालाश्मन्तकन्तथा। वैदूर्य्यंपुलकं मुक्तामयस्ताम्ररजांसि च। समभागानि सम्पिष्य सार्द्धं स्रोतोऽञ्जनेन तु। चूर्णाञ्जनं कारयित्वा भाजने मेषशृङ्गजे। संस्थाप्योभयतः कालमञ्जयेत्ततं बुधः। अर्म्माणि पिडकां हन्यात्सिराजालानि तेन वै। अर्शस्तथा यच्च नाम्ना शुष्कार्शोऽर्बुदमेव च। अभ्यन्तरं वर्त्मशया विधानं तेषु वक्ष्यते। वर्त्मोपस्वेद्य निर्भुज्य सूच्योत्क्षिप्य प्रयत्नतः। मण्डलाग्रेण तीक्ष्णेन मूले छिन्द्याद्भिषग्वरः। ततः सैन्धवकासीसकृष्णाभिः प्रतिसारयेत्। स्थिते च रुधिरे वर्त्म दहेत्सम्यक्शलाकया। क्षारेणावलिखेच्चापि व्याधिशेषो भवेद्यदि। तीक्ष्णैरुभयतो भागैस्ततो दोषमधिक्षिपेत्। वितरेच्च यथादोषमभिष्यन्दक्रियाविधिम्। शस्त्रकर्म्मण्युपरते मासञ्च स्यात्सुयन्त्रितः”।

छेमण्ड पु॰ क्षमण्ड+पृषो॰ अत एत्त्वम्। मातृपितृहीने बालके (छाँड) उज्ज्वलदत्तः।

छेलक पुंस्त्री छो—कर्म्मणि बा॰ एलकन्। १छागे २छाग्यां स्त्री टाप्। भावप्र॰ छागशब्दे दृश्यम्।

छेलु पु॰ छो—बा॰ एलु। सोमराज्याम् शब्दच॰

छेदिक त्रि॰ छेदं नित्यमर्हति ठञ्। नित्यछेदार्हे वेतसे पु॰ सि॰ कौ॰।

छो छेदने दि॰ पर॰ सक॰ अनिट्। छ्यति अच्छात्—अच्छासीत्। चच्छौ। छातः—छितः। [ दैच्छोया)।

छोटिका स्त्री छुट—ण्वुल्। तर्ज्जन्यङ्गुष्ठध्वनौ (तुडी-

छोटिन् पु॰ छुट—णिनि। कैवर्त्ते त्रिका॰।

छोरण न॰ छुर—भावे ल्युट्। १परित्यागे त्रिका॰।

छोलङ्ग पु॰ छुर—बा॰ अङ्गच् रस्य लः। मातुलुङ्गे (टाबालेवु) शब्दरत्ना॰।

छोहारा स्त्री द्वीपान्तरखर्ज्जूरिकायाम्। “खर्जूरी गोस्तनाकारा परद्वीपादिहागता। जायते पश्चिमे देशे सा छोहारेति कीर्त्यते” भावप्र॰ खर्जूरशब्दे २४६८पृ॰ तद्गुणा दृश्याः।

छ्यु गतौ भ्वा॰ आत्म॰ सक॰ अनिट्। छ्यवते अच्छ्योष्ट चोत्वङि अचि(चु)च्छ्यवत् त। णेः सनि चु(चि)च्छ्यावयिषति ते।

इति वाचस्पत्ये छकारादिशब्दार्थनिरूपणम्।

———